IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# सर्वासु वेदशाखानां अग्निहोत्र विवरणम्

**DSV Jagannatha Sharma**
**Assistant Professor**
**Kalpa Department, S.V. Vedic University,Tirupati**

**अग्निहोत्रम्** - एवं पूर्वोक्तप्रकारेण कृताधानः त्रैवर्णिकः आहिताग्निपदवाच्यो भवति। तस्यैव सपत्नीकस्य श्रौतकर्मस्वधिकारः। तानि च श्रौतकर्माणि वेदेषु परस्सहस्राणि विहितानि। तेषां नामतो निर्देशस्त्वन्ते चिकीर्ष्यते। इदानीं तेषामेव केषांचित् स्वरूपं विलिख्यते। तेषु कर्मसु अग्निहोत्रमेव प्रथमपातीति तस्यैव स्वरूपं विव्रियते। तच्च पुरुषेण त्रैवर्णिकेन अवश्यकर्तव्येषु नित्यकर्मसु परिगणितं स्मृतिकारैः। अत एव तत् यावज्जीवमनुष्ठेयम्। दर्शपूर्णमासोक्तः कालविकल्पः — जराजीर्णो वा विरमेत्, विंशतिं वा वर्षाणि अविच्छेदेन अनुष्ठाय ततः परित्यजेत् इत्यादिर्नात्र प्रसरति। तस्य च सायमुपक्रमः ( आरम्भः), प्रातरपवर्गः (समाप्तिः)। एवं च सायं प्रातरिति कालद्वयानुष्ठानादेकं कर्म निष्पन्नं भवति। तत्र सायङ्काले यदा सूर्यरश्मयः भूभागं परित्यज्य वृक्षाग्र एव प्रकाशमाना दृश्यन्ते तदा सायंहोमाः प्रातःकाले च प्राच्यां दिशि यदा रश्मय आविर्भूता भवन्ति तदा च प्रातर्होमा अनुष्ठेयाः॥

**ऋग्वेद संहिता:-** तन्तुं तन्वन् रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान्। अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनम्॥ ता अस्य सूददोहसः सोमं श्रीणन्ति पृश्नयः। जन्मन् देवानां विशस्त्रिष्वा रोचने दिवः॥ अग्न आयूंषि पवस....॥ अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः। तमीमहे महागयम्॥ अने पवस्व स्वपा...॥

**अग्न्युपस्थानम्**

उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये। आरे अस्मे च शृण्वते॥ अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः। मूर्धा कवी रयीणाम्॥ उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै। उभा दाताराविषां रयीणामुभा वाजस्य सातये हुवे वाम्॥ अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः। तं जानन्नग्न आ सीदा था नो वर्धया गिरः॥ अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः। यममवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे॥ अस्य प्रत्नामनु द्य ुतं शुक्रं दुदुहे अहयः। पयः सहस्रसामृषिम्॥ उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि॥ राजन्तमध्वराणां गोपामृतस्य दीदिविम्। वर्धमानं स्वे दमे॥ स नः पितेव सूनवेग्ने सूपायनो भव। सचस्वा नः स्वस्तये॥
अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः॥
वसुरग्निर्वसुश्रवा अच्छा नक्षि द्य ुमत्तमं रयिं दाः॥
सोमानं स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजः॥
यो रेवान् यो अमीवहा वसुवित् पुष्टिवर्धनः। स नः सिषक्तु यस्तुरः॥ मा नः शंसो अररुषो धूर्तिः प्रणङ् मर्त्यस्य। रक्षा णो ब्रह्मणस्पते॥ महि त्रीणामवोस्तु द्य ुक्षं मित्रस्यार्यम्णः। दुराधर्षं वरुणस्य॥ नहि तेषाममा चन नाध्वसु वारणेषु। ईशे रिपुरघशंसः॥यस्मै पुत्रासो अदितेः प्र जीवसे मर्त्याय। ज्योतिर्यच्छन्त्यजस्रम्॥
तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥
कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे। उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते॥ परि ते दूळभो रथोस्माँ अश्नोतु विश्वतः। येन रक्षसि दाशुषः॥

**सायं प्रातः :—** ऋतं त्वा सत्येन परिषिञ्चामि सत्यं त्वर्तेन परिषिञ्चामि सजूर्देवैः सायंयावभिः सजूर्देवैः प्रातर्यावभिः स्वाहा अग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहा सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहा॥

**अग्न्युपस्थानम्**

**तैत्तिरीय संहिता –** उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये। आरे अस्मे च शृण्वते॥ अस्य प्रत्नामनु द्य ुतँ शुक्रं दुदुहे अहयः। पयः सहस्रसामृषिम्॥ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपाँ रेताँ सि जिन्वति॥ अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः। यममवानो भृगवो विरुरुचुर्वनेषु चित्रं विभुवं विशेविशे॥ उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै। उभा दाताराविषाँ रयीणामुभा वाजस्य सातये हुवे वाम्॥ अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः।

तं जानन्नग्न आ रोहा था नो वर्धया रयिम्॥ अग्न आयुँषि पवस आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम्। अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम्। दधत्पोषँ रयिं मयि॥ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया। आ देवान् वक्षि यक्षि च॥

स नः पावक दीदिवोग्ने देवाँ इहावह। उप यज्ञँ विश्व नः॥ अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः। शुची रोचत आहुतः॥ उद शुचयस्तव शुक्रा भ्राजन्त ईरते। तव ज्योतीँ प्यर्चयः॥ आयुर्दा अग्ने स्यायुर्मे देहि वर्चोदा अग्नेसि वर्चो मे देहि तनूपा अग्नेसि तनुवं मे पाह्यग्ने यन्मे तनुवा ऊनं तन्म आ पृण॥ चित्रावसो स्वस्ति ते पारमशीय॥ इन्धानास्त्वा शतँ हिमा द्यु ुमन्तः समिधीमहि वयस्वन्तो वयस्कृतं यशस्वन्तो यशस्कृतँ सुवीरासो अदाभ्यम्। अग्ने सपत्नदम्भनं वर्षिष्टे अधि नाके॥ सं त्वमग्ने सूर्यस्य वर्चसागथाः समृषीणाँ स्तुतेन सं प्रियेण धाम्ना। त्वमग्ने सूर्यवर्चा असि सं मामायुषा वर्चसा प्रजया सृज॥

सं पश्यामि प्रजा अहमिडप्रजसो मानवीः। सर्वा भवन्तु नो गृहे॥ अम्भः स्थाम्भो वो भक्षीय महः स्थ महो वो भक्षीय सहः स्थ सहो वो भक्षीयोजः स्थोर्ज वो भक्षीय॥ रेवती रमध्वमस्मिँल्लोकेस्मिन् गोष्ठेस्मिन् क्षयेस्मिन् योनाविहैव स्तेतो माप गात बह्वीर्मे भूयास्त॥ सँ हितासि विश्वरूपीरा मोर्जा विशा गौपत्येना रायस्पोषेण सहस्रपोषं वः पुष्यासं मयि वो रायः श्रयन्ताम्॥

उप त्वाग्ने दिवेदिवे....॥ राजन्तमध्वराणां ....॥ स नः पितेव सूनवे....॥ अग्ने त्वं नो अन्तमः। उत त्राता शिवो भव वरूथ्यः॥ तं त्वा शोचिष्ठ दीदिवः। सुम्नाय नूनमीमहे सखिभ्यः॥ वसुरग्निर्वसुश्रवाः। अच्छा नक्षि द्यु ुमत्तमो रयिं दाः॥

ऊर्जा वः पश्याम्यूर्जा मा पश्यत रायस्पोषेण वः पश्यामि रायस्पोषेण मा पश्यतेडाः स्थ मधुकृतः स्योना माविशतेरा मदः। सहस्रपोषं वः पुष्यासं मयि वो रायः श्रयन्ताम्॥ तत् सवितुर्वरेण्यं....॥

सोमानँ स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजम्॥ कदा चन स्तरीरसि नेन्द्र सश्रसि दाशुषे। उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते॥परि त्वाग्ने पुरं वयं विप्रँ सहस्य धीमहि। धृषद्वर्ण दिवेदिवे भेत्तारं भङ्गुरावतः॥ अग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासँ सुगृहपतिर्मया त्वं गृहपतिना भूयाः शतँ हिमास्तामाशिषमा शासे तन्तवे ज्योतिष्मतीं तामाशिषमा शासेमुष्मै ज्योतिष्मतीम्॥

## अग्न्युपस्थानम्

**तैत्तिरीय संहिता—** उपप्रयन्तो अध्वरमित्याह षद्भिरुप तिष्ठते° षड्भिरुत्तराभिरुप तिष्ठते। द्वादश सं पद्यन्ते° संवत्सरस्य परस्तादाग्निपावमानीभिरुप तिष्ठते° इन्धानास्त्वा शतँ हिमा इत्याह° यदेतया समिवमादधाति° सँ हितासि विश्वरूपीरिति वत्समभि मृशति° प्र वा एषोस्माल्लोकाच्यवते य आहवनीयमुप तिष्ठते। गार्हपत्यमुप तिष्ठतेस्मिन्नेव लोके प्रति तिष्ठति। अथो गार्हपत्यायैव नि हुते। गायत्रीभिरुप तिष्ठते° तृचमन्वाह° द्विपदाभिर्गार्हपत्यमुप तिष्ठते° पुत्रस्य नाम गृह्णाति° तामाशिषमा शासे तन्तवे ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रोजातः स्यात्। तेजस्व्येवास्य ब्रह्मवर्चसी पुत्रो जायते। तामाशिषमा शासेमुष्मै ज्योतिष्मतीमिति ब्रूयाद्यस्य पुत्रो जातः स्यात्° अग्निहोत्रं° जुहोति° यत्सायं जुहोति। रेत एव तत्सिञ्चति। प्रैव प्रातस्तनेन जनयति° बह्वीभिरुप तिष्ठते° नक्तमुप तिष्ठते न प्रातः° उपस्थेयोमी नोरपस्थेया३ इत्याहुः° अथ को देवानहरहर्याचयिष्यतीति तस्मान्नोपस्थेयः। अथो खल्वाङ्कुराशिषे वै कं यजमानो यजत इत्येन खलु वा आहिताग्नेराशीर्यदग्निमुप तिष्ठते तस्मादुपस्थेयः° यो वा अग्निं प्रत्यङ्डुप तिष्ठते प्रत्येनमोषति यः पराङ् विष्वङ् प्रजया पशुभिरेति। कवातिर्यङिवोप तिष्ठेत। नैनं प्रत्योषति न विष्वङ् प्रजया पशुभिरेति°॥

## अग्न्युपस्थानम्

**मैत्रायणी संहिता-** उपप्रयन्तो अध्वरं....॥ अग्निर्मूर्धा दिवः ककुत्...॥ उभावामिन्द्राग्नि आहुवध्यै ....॥ अयमिह प्रथमो धायि धातृभिः॥ अस्य प्रत्नामनु द्युतं ....॥ अयं ते योनिर्ऋत्वियो.... ततो नो वर्धया रयिम्। दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखा करत्प्र ना अयुन्षी तारिषत्॥ अग्ना अयुन्षी पवसा...॥ अग्निर्ऋषिः पवमानः ....॥ अग्ने पवस्व स्वपा...॥ अग्ने पावक रोचिषा...॥ स नः पावक दीदिवोग्ने....॥ अग्निः शुचिव्रततमः ....॥ उदग्ने शुचयस्तव....॥ अग्नीषोमा इमँ सु मे शृणुतं वृषणा हवम्। प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः॥ अग्निस्तिग्मस्तिग्मतेजाः प्रति रक्षो दहतु सहतामरातिम्। अपाधशँसं नुदताम्॥

अग्ने सपत्नसाह सपत्नान् मे सहस्व। मा मा तितीर्षन् तारीत्॥ त्वमग्ने सूर्यवर्चा असि सं मामायुषा वर्चसा सृज || सं त्वमग्ने सूर्यस्य ज्योतिषागथाः। समृषीणाँ स्तुतेन सं प्रियेण धाम्ना समहमायुषा सँ वर्चसा सं प्रजया सँ रायस्पोषेण ग्मीय। इन्धानास्त्वा ....। वयस्कृतँ सहस्वन्तः सहस्कृतम्। अग्ने सपत्नदम्भनँ सुवीरासो अदाभ्यम्॥ अग्नेः समिदस्य- मिशस्त्या मा पाहि॥ सोमस्य समिदसि परस्पा म एधि॥ यमस्य समिदसि मृत्योर्मा पाहि॥ आयुर्धा अग्नेस्यायुर्मे धेहि। वर्चोधा अग्नेसि वर्चो मे धेहि। चक्षुष्पा अग्नेसि चक्षुर्मे पाहि। श्रोत्रपा अनेसि श्रोत्रं मे पाहि। तनूपा अग्नेसि तन्वं मे पाहि। यन्मे अग्न ऊनं तन्वस्तन्मा आपूण || अग्ने यत्ते तपस्तेन तं प्रतितप यो अस्मान् द्वेष्टि यं च वयं द्विष्मः॥ अग्ने यत्ते शोचिस्तेन तं प्रतिशोच यो अस्मान्॥ अग्ने यत्ते अर्चिस्तेन तं प्रत्यर्च यो अस्मान् ....॥ अग्ने यत्ते हरस्तेन तं प्रतिहर यो अस्मान् ....॥ अग्ने यत्ते तेजस्तेन तं प्रतितितितिग्धि यो अस्मान् ....॥ अग्ने रुचां पते नमस्ते रुचे मयि रुचं धाः॥ चित्रावसो स्वस्ति ते पारमशीयार्वाग्वसो स्वस्ति ते पारमशीय। अम्भः स्थाम्भो वो भक्षीय महः स्थ महो वो भक्षीयोर्जः स्थोर्ज वो भक्षीय रायस्पोषः स्थ रायस्पोषँवो भक्षीय॥ रेवती रमध्यमस्मिन् योना अस्मिन् गोष्ठे। अयँ वो बन्धुरितो मापगात बह्वीभवत मा मा हासिष्ट। सँ हितासि विश्वरूपा मोर्जा विशा गौपत्येना प्रजया रायस्पोषेण॥ मयि वो रायः श्रयन्ताँ सहस्रपोषँ

वोशीय। उप त्वाग्ने दिवे दिवे....॥ राजन्तमध्वराणां....॥ स नः पितेव सूनवे ....॥ अग्ने त्वं नो अन्तम...॥ तं त्वा शोचिष्ठ दीदिवः....॥ वसुरग्निर्वसुश्रवा.....॥ स नो बोधि श्रुधी हवमुरुष्या नो अघायतः समस्मात्॥

अभ्यस्ताँ विश्वाः पृतना अरातीस्तदग्निराह तदु सोम आह। बृहस्पतिः सवितेन्द्रस्तदाह पूषा ना आधात् सुकृतस्य लोके॥ ऊर्जा वः पश्याम्यूर्जा मा पश्यत। रय्या वः पश्यामि रय्या मा पश्यत॥ संपश्यामि प्रजा अहमिडप्रजसो मानवीः। सर्वा भवन्तु नो गृहे॥ इडाः स्थ मधुकृतः स्योना माविशतेरंमदः। सहस्रपोषँ वोशीय॥ भुवनमसि सहस्रपोषपुषि तस्य नो रास्व तस्य ते भक्तिवानो भूयास्म। इडासि व्रतभृत् त्वयि व्रतँ व्रतभृदसि॥

महि त्रीणामवोस्तु द्युक्षं मित्रस्यार्यम्णः। दुराधर्षं वरुणस्य॥ नहि तेषाममा सतां नाध्वसु वारणेषु च। ईशे रिपुरघशँ सः॥ ते हि पुत्रासो अदिते छर्दिर्यछन्त्यजस्रम्। प्र दाशुषे वार्याणि॥ सोमानँ स्वरणं .... औशिजः॥ यो रेवान् यो अमीवहा वसुवित् पुष्टिवर्धनः। स नः सिषक्तु यः शिवः॥ मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसि। द्युम्नं चित्रश्रवस्तमम्॥ कदा च न स्तरीरसि ....॥ कदा च न प्रयुछसि ....॥

परि ते दूडभो रथोस्मं अश्नोतु विश्वतः। येन रक्षसि दाशुषः॥ निम्रदोसि न्यहं तं मृद्यासँ यो अस्मान् द्वेष्टि यं च वयं द्विष्मः॥ अभिभूरस्यभ्यहं तं भूयासँ यो अस्मान्॥ प्रभूरसि प्राहं तमतिभूयासँ यो अस्मान् ....॥ पूषा मा पथिपाः पातु पूषा मा पशुपाः पातु पूषा माधिपाः पातु॥ प्राची दिगग्निर्देवता। यो मैतस्या दिशो अभिदासादग्निँ सा ऋछतु। दक्षिणा दिगिन्द्रो देवता। यो मैतस्या दिशो अभिदासादिन्द्रँ सा ऋछतु। प्रतीची दिङ् मरुतो देवता। यो मैतस्या दिशो अभिदासान्मरुतः सा ऋछतु॥ उदीची दिङ् मित्रावरुणौ देवता। यो मैतस्या दिशो अभिदासान्मित्रावरुणौ सा ऋछतु॥ ऊर्ध्वा दिक्सोमो देवता। यो मैतस्या दिशो अभिदासात्सोम सा ऋछतु। धर्मो मा धर्मणः पातु विधर्मे मा विधर्मणः पात्वायुश्च प्रायुश्च चक्षुश्च विचक्षुश्च प्राङ् चापाङ् चोरुक उरुकस्य ते वाचा वयँ सं भक्तेन गमेमह्याग्ने गृहपते॥

## अग्न्युपस्थानम्

उपप्रयन्तो अध्वरमिति॰ षड्भिरुपतिष्ठते॰ दधिक्राव्णो अकारिषमिति दधिक्रावत्योपतिष्ठते॰ सप्तभिरुपतिष्ठते॰ तदेतान्येवाग्न्याधेयस्य हवीँ षि सँ वत्सरे स वत्सरे निर्वपेत्॰ तन्न सूक्ष्र्यम्। एताभिरेवाग्नेयपावमानीभिरग्न्याधेयस्य याज्यानुवाक्याभिरुपस्थेयः॰ द्वादशभिरुपतिष्ठते॰ अग्नीषोमीयया त्रयोदश्योपस्थेयः॰ ब्रह्मवादिनो वदन्ति कस्मात् सायमग्निमुपतिष्ठन्ते कस्मात् प्रातर्नेति। असौ वा आदित्यः सायमासुवति। तस्मात् सायमुपतिष्ठन्ते। एष प्रातः प्रसुवति। तस्मात् प्रातर्नोपतिष्ठन्ते। तस्मात्सायमहुतेग्निहोत्रेग्निहोत्रेण नाशितव्यम्। तस्मादु प्रातरहुते नाशितव्यम्। तस्मात्सायमतिथये प्रत्येनसः। पुण्यत्वात्तु प्रातर्ददति। प्रातरवनेगेन प्रातरुपस्थेयः। अधिश्रित उन्नीयमाने वा हस्ता अवनेनिजीत। तत्र विहव्यस्य चतस्रा ऋचो वदेत् प्रातरखनेगे चतस्रः॰ अग्नीषोमीयया पूर्वपक्ष उपस्थेयः॰ ऐन्द्राग्न्यापरपक्ष उपस्थेयः॰ इन्धानास्त्वा शतँ हिमा इति पृतनाजिध्दथाहुतिः। तया राजन्या उपतिष्ठेत॰ परा पाप्मानं भ्रातृव्यं भावयति य एवँ विद्वानेताः समिध आदधात्यग्नेः समिदस्यभिशस्त्या मा पाहीति॰ चित्रावसो स्वस्ति ते पारमशीयेति॰ त्रिराह॰ अम्भः स्थाम्भो वो भक्षीयेति॰ वत्समालभते॰ सँ हितासि विश्वरूपेति॰ नामासामग्रहीन्मित्रमाभिरकृत॰ उप त्वाग्ने दिवे दिवा इति यदेतेन गायत्रेण तृचेनोपतिष्ठते॰ अग्ने तवं नो अन्तमा इति॰ चतसृभिर्द्विपदाभिरुपतिष्ठते॰ महि त्रीणामवोस्त्विति प्राजापत्येन तृचेनोपतिष्ठते॰ सोमानँ स्वरणमिति ब्राह्मणस्पत्ययोपतिष्ठते मित्रस्य॰ चर्षणीधृता इति मैत्र्योपतिष्ठते॰ कदा च न स्तरीरसीत्यैन्द्रीभ्यां बृहतीभ्यामुपतिष्ठते॰ निम्रदोसि न्यहं तं मृद्यासँ यो अस्मान् द्वेष्टि यं च वयं द्विष्म इति पार्ष्ण्यावगृह्णीयाद्यदि पापीयसा स्पर्धेत। अभिभूरस्यभ्यहं तं भूयास" यो अस्मान् द्वेष्टि यं च वयं द्विष्म इति दक्षिणतः पदोवगृह्णीयाद्यदि सदृशेन स्पर्धेत। प्रभूरसि प्राहं तमति भूयासँ यो अस्मान् द्वेष्टि यं च वयं द्विष्म इति प्रपदेनावगृह्णीयाद्यदि श्रेयसा स्पर्धेत॰ पूषा मा पथिपाः पात्वितीयमेव। पूषा मा पशुपाः पात्वित्यन्तरिक्षमेव। पूषा माधिपाः पात्वित्यसा एव॰ धर्मो मा धर्मणः पातु.... चोरुक इति॰ अग्ने गृहपतेग्निँ समिन्धे यजमानः॰ ज्योतिषे तन्तवे त्वेत्यन्तराग्नि उपविश्य वदेत्॰ यद्यत्कामयेत तत्तदग्निहोत्र्यग्निँ याचेत्। उप हैनं तन्नमति॰ अग्नीषोमीयायाः पुरस्ताद्विहव्यस्य चतस्रा ऋचो वदेत्। आग्नेयस्य पुरोडाशस्य द्वे याज्यानुवाक्ये कुर्यात्। एतेनैव हवीँ ष्यासन्नान्यभिमृशेत्॰॥

## अग्न्युपस्थानम्

**काठक संहिता–** उपप्रयन्तो अध्वरं ....।अस्य प्रत्नामनु ध्युतँ....॥ अग्निर्मुर्धा दिवः ककुत्....॥ उभा वामिन्द्राग्नी आहुवध्या...॥ अयमिह प्रथमो धायि धातृभि .....॥ अयं ते योनिर्ऋत्वियो....॥ दधिक्राव्णो अकारिषं....॥

त्वमग्ने सूर्यवर्चास्सं मामायुषा ....॥ सं त्वमग्ने सूर्यस्य ....॥ इन्धानास्त्वा शर्तें हिमा.... वयस्वन्तो वयस्विनं यशस्वन्तो यशस्विनम्। सुवीरासो अदाभ्यमग्ने सपत्नदम्भनम्॥ आयुर्धा अग्नेस्यायुर्मे धेहि वयोधा अग्नेसि वयो मे धेहि तनूपा अग्नेसि तन्वं मे पाहि॥ यन्मे अग्न ऊनं तन्वस्तन्म आपण ॥ अग्नेस्समिदस्यभिशस्त्या मा पाहि॥ सोमस्य समिदसि परस्पा म एधि॥ यमस्य समिदसि मृत्योर्मा पाहि अग्ने यत्ते तपस्तेन तं प्रतितप योस्मान् द्वेष्टि यं च वयं द्विष्मः॥ अग्ने यत्ते शोचिस्तेन तं प्रतिशोच योस्मान् ...॥ अग्ने यत्ते तेजस्तेन तं प्रतितितिग्धि योस्मान् ...॥ अग्ने यत्ते र्चिस्तेन तं प्रत्यर्च योस्मान् ....॥ अग्ने यत्ते हरस्तेन तं प्रतिहर योस्मान्॥ अग्ने रुचां पते नमस्ते रुचे मयि रुचं धेहि॥ चित्रावसो स्वस्ति ते पारमशीयार्वाग्वसो स्वस्ति ते पारमशीय॥

अम्भस्स्थाम्भो वो भक्षीय महस्स्थ महो वो भक्षीयोर्जस्स्थोर्ज वो भक्षीय रायस्पोषस्स्थ रायस्पोषं वो भक्षीय॥ रेवती रमध्वं.... मा मा हासिष्ट बह्वीर्मे भवत॥ सहितासि विश्वरूपा ... सहस्रपोषं वः पुषेयम्॥ संपश्यामि .... बह्वीर्भवन्तु नो गृहे॥ उप त्वाग्ने दिवे दिवे....॥ राजन्त- मध्वराणां ....॥ स नः पितेव सूनवे....॥ अग्ने त्वं नो अन्तमः॥ तं त्वा शोचिष्ठ दीदिवः ....॥ वसुरग्निर्वसुश्रवा....॥ स नो बोधि श्रुधी हवं....॥ ऊर्जा वः पश्याम्यूर्जा मा पश्यत रायस्पोषेण वः पश्यामि रायस्पोषेण मा पश्यत। इडास्स्थ मधुकृतस्स्योना मा विशतेरंमदो मयि वो रायश्यन्तीं सहस्रपोषं वः पुषेयम्॥ महि त्रीणामवोस्तु ....॥ नहि तेषाममा चन यस्मै पुत्रासो अदितेः प्र जीवसे मर्त्याय। ज्योतिर्यच्छन्त्यजस्रम्॥ सोमान स्वरणं....॥ यो रेवान् यो.....यस्तुरः॥

मा नश्शिसो अररुषो धूर्तिः प्रणङ् मर्त्यस्य। रक्षा णो ब्रह्मणस्पते॥ कदा चन स्तरीरसि ....॥ परि ते दूडभो रथो.....! अच्छिन्नो दैव्यस्तन्तुर्मा मनुष्यश्छेदि॥ निम्रदोसीदमहं तं निमृणामि योस्मान् द्वेष्टि यं च वयं द्विष्मः॥ अभिभूरस्यभ्यहं तं भूयासं योस्मान् ...॥ प्रभूरसि प्राहं तमतिभूयासं योस्मान् ....॥ पूषा मा प्रपथे पातु पूषा मा पशुपाः पातु पूषा माधिपतिः पातु॥ प्राची दिगग्निर्देवता। अग्निं स ऋच्छतु यो मैतस्या दिशोभिदासति। दक्षिणा दिगिन्द्रो देवता। इन्द्रं स ऋच्छतु....॥ उदीची दिङ् मित्रावरुणौ देवता। मित्रावरुणौ स ऋच्छतु ....॥ ऊर्ध्वा दिग्बृहस्पतिर्देवता। बृहस्पतिं स ऋच्छतु....॥ इयं दिगदितिर्देवता। अदिति स ऋच्छतु....|| ज्योतिषे तन्तव आशिषमाशासेसा अनु मा तनु॥

**अग्निहोत्रहोमविधिः**

**काठक संहिता-** प्रजापतिर्वा इदमासीत्। तस्मादग्निरध्यसृज्यत। सोस्य मूर्ध ऊर्ध्व उददवत्। तस्य यल्लोहितमासीत्तदपामृष्ट। तद्भूम्यां न्यमार्ट्। तत उदुम्बरोजायत। तस्मात् स लोहितं पच्यते। स प्राङ् प्राद्रवत्। तं स्वा वागैट्ट जुहुधीति। स इतः पर्यमृष्ट। तत् स्वाहेत्यजुहोत्। तस्मादेषैवमाहुतिः। स्वा होनं वागैट्ट। तस्मान्न ललाटे लोमास्ति न पाण्योः।

तस्मादरत्निमात्री स्रुग्भवति॰ तस्मात् प्रोक्षन्नग्निं न प्रापयेत्॰ तत्पयसाग्निहोत्रं जुहोति॰ यद्यवाग्वाग्निहोत्रं जुहोति॰ तस्मादचक्रवृत्तामग्निहोत्रतपनी कुर्वीत। न क्षीरेण प्रतिषिश्चेन्नोदकेन॰ दोहने संस्रावमुच्छिष्य तेनोदकमिश्रेण प्रतिषिश्चेत्॰ प्रतिषिक्तमन्यदप्रतिषिक्तमन्यत्। प्रतिषिक्तं पशुकामस्याप्रतिषिक्तं ब्रह्मवर्चसकामस्य॰ यदप्रतिषिक्तेन जुहोति ब्रह्मवर्चसी भवति। यदि पयो न विन्देदाज्येन जुहुयात्॰ यदि पयो न विन्देद्यवाग्वा जुहुयात्॰ अग्निहोत्रे वै जायापती व्यभिचरेते॰ संप्रत्युदीचीनमुद्वासयेत्॰ पूर्णमग्र उन्नयेदथ संमितमथ संमितमथ संमिततममुत्तमम्। अनुज्येष्ठमेवास्य पुत्रा ऋध्नुवन्ति। संमितमग्र उन्नयेदथ भूयोथ भूयोथ पूर्णमुत्तमम्। भूयोभूय एवान्नाद्यमभ्युत्क्रामति। कनिष्ठस्त्वस्य पुत्राणामर्धुको भवति। सर्वान् समावदुन्नयेद्यः कामयेत सर्वे मे पुत्रास्समावदृध्नुयुरिति॰ चतुरुन्नयति॰ पशून्मे यच्छेति पश्चादुपसादयेत्॰ न पश्चादुपसादयेत्॰ उत्तरादुपसादयेत्॰ यत्समयाग्नि हरति॰ तस्मादग्निहोत्रं पश्चादधिश्रित्य पुरो जुह्वति। पुर एवान्यानि हवींषि शृतानि कुर्वन्ति। पुरो जुह्वति॰ यत्समिधमादधाति॰ बहुद्वीकरोति एकैव कार्या आयुर्मे यच्छ वर्षों मे यच्छ प्रजां मे यच्छेति पुर उपसादयेत् अग्नौ ज्योतिज्योतिरग्ना इति सायमग्निहोत्रं जुहुयात् सूर्यो ज्योतिज्योतिस्सूर्य इति प्रातः॰ यन्निरुक्तं चानिरुक्तं च तन्मिथुनम्। यद्यजुषा च मनसा च तन्मिथुनम्॰ अम्नस्सूर्ये निम्रुक्ते सायमग्निहोत्रं जुहुयात्। उपोदय सूर्यस्य प्रातः॰ एषा वा अग्निहोत्रस्य स्थाणुर्या पूर्वाहुतिः। तामतिहाय जुहुयात्॰ अभिक्राम साथै होतव्यम्॰ प्रतिकामं प्रातः॰ तदाडुरभिक्राममेव होतव्यम्॰ तस्माद् द्वे होतव्ये यजुषा मनसा च॰ न राजन्यस्याग्निहोत्रमस्ति। अत्रत्यो हि सः। हन्ति व्रतम्। न विच्छिन्द्यात्। पौर्णमासीं च रात्रीममावस्यां च जुहुयात्। ते हि व्रतं गोपायति ( ?॰तः)।

यान्यहानि न जुहुयात्तान्यस्य ब्राह्मणायाग्रे गृह उपहरेयुः॰ भूर्भुवस्स्वरग्नौ ज्योतिज्योतिरग्ना इत्यग्निहोत्रं जुहुयात्॰ वाचं यच्छेदग्निहोत्र उन्नीयमाने॰ यर्हि बिन्दव इव स्युस्तर्ह्यवेक्षेतोद्द्रवस्स्थोदहं प्रजया प्र पशुभिर्भूयासमिति॰ अग्निनावेक्षते॰ न सुशृतं कुर्यात्॰ नो अनृतम्। अन्तरेणैव स्यात्। रुद्र मृडानार्भव मृड धूर्ते नमस्तेस्त्विति हुत्वोदबुद्दिशेत्॰ यद्वियं देवः प्रजा अभिमन्येत सजूर्जातवेदो दिवा पृथिव्या हविषो वीहि स्वाहेति द्वादश रात्रीरग्निहोत्रं जुहुयात्॰॥ संवत्सरं वा एतमिन्धतेग्निं वैश्वानरम्। न वा एतस्य संवत्सरेप्यस्ति न वैश्वानरे योनाहिताग्निः। यानि दारूणि ते मासाः। ये स्थूला अङ्गारास्ते ऋतवः। ये अणीयीसस्तेर्धमासाः। मुर्मुरा अहोरात्राणि। यत्सुवर्णं ज्योतिस्तद्वार्हस्पत्यम्। यन्न सुवर्णं न लोहितं तन्मैत्रम्। यल्लोहितं तद्वारुणम्। यत्सधूमं तद्वैश्वदेवम्। यत्राङ्गारेष्वग्निर्लेलायेव तदस्यास्यम् | आविर्नाम तद्ब्रह्म। तस्मिन् होतव्यम्। मुखेन वा अश्नाति, अङ्गान्यवति, आविः प्रजासु भवति, श्श्शो वसीयान् भवति यस्यैवमग्निहोत्र इयते। ओदनपचनो गार्हपत्य आहवनीयो मध्याधिदेव- नमामन्त्रणमेषा वै विराट् पश्चपदा॰ न स्वाहाकुर्यात्। यर्हिँ वाक् प्रवदेत्तर्हि जुहुयात्॰ सजरग्निर्दिवा पृथिव्येति द्यावापृथिवी अग्निम्॰ सजूर्देवेन सवित्रेति॰ सजूः पूष्णान्तरिक्षेणेति॰ सजू रात्र्येन्द्रवत्या स्वाहेति॰ सजूरहेन्द्रवता स्वाहेति॰ अग्नेदाम्य जुषस्व स्वाहेत्युत्तरामाहुतिं जुहोति॰ अपिप्रेरग्ने स्वां तन्वमयाड् द्यावापृथिवी ऊर्जमस्मासु घेहीति तृणमङ्क्त्वानुप्रहरति॰ अग्ने गृहपते जुषस्व स्वाहेति स्रुवेण गार्हपत्ये जुहोति॰॥

**अग्न्युपस्थानम्**

वाजसनेय काण्व संहिता- उपप्रयन्तो....॥ अग्निर्मूर्धा दिवः ककुत्....॥ उभा वामिन्द्राग्नी आहुवध्या...॥ अयं ते योनिर्ऋत्वियः॥ अयमिह प्रथमो धायि धातृभिः...॥ अस्य प्रत्नामनु द्युतं शुक्रं....॥ तनूप अग्नेसि तन्वं मे पाह्यायुर्दा अग्नेस्यायुर्मे देहि वर्चोदा अग्नेसि वर्चो मे देहि अग्ने यन्मे तन्वा ऊनं तन्म आपण॥ इन्धानास्त्वा शतं हिमा द्युमन्त समिधीमहि। वयस्वन्तो वयस्कृतं सहस्वन्तः सहस्कृतम्। अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम्। चित्रावसो...॥ सं त्वमग्ने सूर्यस्य....सं प्रियेण धाम्ना संमहमायुषा सं वर्चसा सं प्रजया सं रायस्पोषेण ग्मिषीय॥ अन्ध स्थान्धो वो भक्षीय मह स्थ महो वो भक्षीयोर्ज स्थोर्ज वो भक्षीय रायस्पोष स्थ रायस्पोषं वो भक्षीय॥ रेवती रमध्वमस्मिन् योनावस्मिन् गोष्ठेस्मिँल्लोकेस्मिन् क्षये। इहैव स्त मापगात॥ संहितासि विश्वरूप्यूर्जा माविश गौपत्येन॥ उप त्वाग्ने दिवेदिवे....॥ राजन्तमध्वराणां....॥ स नः पितेव सूनवे....॥ अग्ने त्वं नो अन्तम ....॥ वसुरग्नि॰ .....धुमत्तमं रयिं दाः॥ तं त्वा शोचिष्ठ दीदिवः....॥ स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात्॥ इड एह्यदित एहि काम्या एत। मयि वः कामधरणं भूयात्॥ सोमानं स्वरणं .... औशिजः॥

यो रेवान् यो अमीवहा वसुवित् पुष्टिवर्धनः। स नः सिषक्तु यस्तुरः॥ मा नः शंसो अररुषो धूर्तिः प्रणङ् मर्त्यस्य। रक्षा णो ब्रह्मणस्पते॥ महि त्रीणामवोस्तु द्युक्षं मित्रस्यार्यम्णः। दुराधर्षं वरुणस्य॥ नहि तेषाममा चन नाध्वसु वारणेषु। ईशे रिपुरघशंसः॥ ते हि पुत्रासो अदितेः प्र जीवसे मर्त्याय। ज्योतिर्यच्छन्त्यजस्रम्॥ कदा चन स्तरीरसि.....॥ तत्सवितुर्वरेण्यं....॥ परि ते दूडभो रथोस्माँ अश्नोतु विश्वतः। येन रक्षसि दाशुषः॥ भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्या सुवीरो वीरैः सुपोषः पोषैः॥

**अग्निहोत्रहोमविधिः**

**शाङ्खायन ब्राह्मणम् -** स यत्सायमस्तमिते जुहोति॰ यत्प्रातरनुदिते जुहोति॰ स यः पुरादित्यस्यास्त-मयादाहवनीयमुद्धरति॰ समेवान्ये यज्ञास्तिष्ठन्ते। अग्निहोत्रमेव न संतिष्ठते॰ तद् दुग्ध्वाधिश्रयति। शृतमसदिति॰ तद्वै नोदन्तं कुर्यात्॰ अधिश्रित्यैव जुहुयात्॰ तदवज्योतयति शृतं वेदानीति। अथापः प्रत्यानयति॰ अथ चतुरुन्नयति॰ अथ समिधमादायोदाद्रवति समिद्धहोमायैव। सोनुपसाद्य पूर्वामाहुतिं जुहोति॰ उपसाद्य उत्तराम्॰ स वै द्विरग्नौ जुहोति द्विरुपमार्ष्टि द्विः प्राश्नाति चतुरुन्नयति तदश॰ सा या पूर्वाहुतिः सात्मानमभिहूयते। तां मन्त्रेण जुहोति॰ अथ योत्तरा सा प्रजामभिहूयते। तां तूष्णीं जुहोति॰ स जुहोत्यग्निर्ज्योतिज्योतिरग्निः स्वाहेति॰ तदु हैतदेवारुणये ब्रह्मवर्चसकामाय तक्षानूवाच अग्निर्वर्चो ज्योतिर्वर्चः, सूर्यो वर्चो ज्योतिर्वर्चः इति॰ तदु होवाच जीवलचैलकिः॰ स एतेनैव सायं जुहुयात्। अथ प्रातः ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहेति॰ अनेनैव जुहुयात्सजूर्देवेन सवित्रेति॰ सजू राज्येन्द्रवत्येति॰ जुषाणो अग्निर्वेतु स्वाहेति॰ अथ प्रातः सजूर्देवेन सवित्रेति॰ सजूरुषसेन्द्रवत्येति॰ जुषाणः सूर्ये वेतु स्वाहेति॰ स यत्सुचि परिशिनष्टि तदग्निहोत्रोच्छिष्टम्। अथ यत्स्थाल्यां यथा परीणहो निर्वपेदेवं तत्। तस्मात्तद्य एव कश्चन पिबेत्। तद्वै नाब्राह्मणः पिबेत्॰॥

अयैव भ्रातृव्यदेवत्यो यदन्वाहार्यपचनः। तस्मादेतं नाहरहराहरेयुः॰ उपवसथ एवैनमाहरेयुः। यत्रैवास्मिन् यक्ष्यन्तो भवन्ति॰ नवावसथे वैनमाहरेयुः। तस्मिन् पचेयुः। तद् ब्राह्मणा अश्नीयुः। यद्यु तन्न विन्देत् यत् पचेदपि गोरेव दुग्धमधिश्रयितवै ब्रूयात्। तस्मिन् ब्राह्मणान् पाययितवै ब्रूयात्॰ तद्यत्रैतत् प्रथम समिद्धो भवति धूप्यत इव तर्हि हैष भवति रुद्रः। स यः कामयेत यथेमा रुद्रः प्रजा अश्रद्धयेव त्वत् सहसेव त्वत् निघातमिव त्वत्सचते एवमन्नमयामिति, तर्हि ह स जुहुयात्॰ अथ यत्रैतत् प्रदीप्ततरो भवति तर्हि हैष भवति वरुणः। स यः कामयेत यथेमा वरुणः प्रजा गृहन्निव त्वत् सहसेव त्वत् निघातमिव त्वत्सचते एवमन्नमद्यामिति, तर्हि ह स जुहुयात्॰ अथ यत्रैतत् प्रदीप्ततरो भवति उच्चैर्धूमः परमया जूत्या बल्बलीति तर्हि हैष भवतीन्द्रः। स यः कामयेतेन्द्र इव श्रिया यशसा स्यामिति, तर्हि ह स जुहुयात्॰ अथ यत्रैतत् प्रतितरामिव तिरश्रीवार्चिः सशाम्यतो भवति तर्हि हैष भवति मित्रः। स यः कामयेत मैत्रेणेदमन्नमद्यामिति यमाहुः सर्वस्य वा अयं ब्राह्मणो मित्रम्, न वा अयं कंचन हिनस्तीति, तर्हि ह स जुहुयात्॰ अथ यत्रैतदङ्गाराश्चाकशन्त इव, तर्हि हैष भवति ब्रह्म। स यः कामयेत ब्रह्मवर्चसी स्यामिति तर्हि ह स जुहुयात्॰ एतेषामेक संवत्सरमुपेत्स्तेंत् स्वयं जुहृद्यदि वास्यान्यो जुहुयात्॰ स वै कनीय इव पूर्वामाहुतिं जुहोति भूय इवोत्तरां भूय इव सुचि परिशिनष्टि॰ पूर्वेणाहवनीयं परीत्यान्तरेण गार्हपत्यं चैति॰ उत्तरतो वा अग्निहोत्रस्य द्वारम्॰ नौर्ह वा एषा स्वर्ग्य यदग्निहोत्रम्। तस्या एतस्यै नावः स्वर्ग्याया आहवनीयश्चैव गार्हपत्यश्च नौमण्डे। अथैष एव नावाजो यत्क्षीरहोता॰॥

## अग्न्युपस्थानम्

**जैमिनीय ब्राह्मणम्-** उपप्रयन्तो अध्वरं....॥ अग्निर्मूर्धा....॥ उभा वामिन्द्राग्नी....। उभा दातारा इषाँ....॥ अयं ते योनिः॥ अयमिह प्रथमो....॥ अस्य प्रत्नामनु....॥ तनूपा अग्नेसि तन्वं मे पाहि....। इन्धानास्त्वा शतँ हिमा.....॥ चित्रावसो....॥ सं त्वमने सूर्यस्य....॥ अन्ध स्थान्धो वो....॥ रेवती रमध्वं .... योना अस्मिन् गोष्ठेस्मिन् क्षयेस्मिन् लोके। इहैव स्वेतो मापगात॥ सहितासि॥ उप त्वाग्ने दिवेदिवे...॥ राजन्तमध्वराणां ....॥ स नः पितेव॥ अग्ने त्वं नो....॥ तं त्वा शोचिष्ठ...॥ इळ एह्यदित एहि काम्य एहि.... || सोमानँ स्वरणं....॥ यो रेवान् यो....॥ मा नः शँसो....॥ महि त्रीणामवोस्तु ....॥ नहि तेषाममा....॥ ते हि पुत्रासो अदितेः....॥ कदा चन स्तरीरसि .....॥ तत्सवितुर्वरेण्यं....॥ परि ते दूळभो रथो ....। समिद्धो मा समर्धय प्रजया च धनेन च॥ भूर्भुवः स्वः सुप्रजाः प्रजया भूयासम्। सुवीरो वीरैः सुपोषः पोषैः॥

## अग्निहोत्रहोमविधिः

**जैमिनीय ब्राह्मणम् -** तद्वा अपराजितं यदग्निहोत्रम्॰ स यत्पुरस्तादप उपस्पृशति॰ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा इत्यष्टाक्षरेण जुहोति॰ मनसा निष्केवल्येनोत्तरामाडुतिं जुहोति॰ उपरिष्टादप उपस्पृशति॰ स यदेते सायमाहुती जुहोति॰ अथ यदेते प्रातराहुती जुहोति॰ तदेतदपर्यन्तं यदग्निहोत्रम्॰ अथ पशुकामः सायं पशुषु समेतेष्वग्निहोत्रं जुहुयात्॰ अविसृष्टेषु प्रातः॰ अथ स्वर्गकामः द्वौ समुद्रावचर्यो विततौ महान्तावा वरीवर्तेते चर्येत्र पादौ इति॰ अस्तमिते पुरा तमिस्रायै सुव्युष्टायां पुरोदयात्॰ स यद्ब्राह्मणोग्निहोत्रपात्राणि निर्णेनेक्ति॰ अथ यत्पयो दुहन्ति॰ अथ यदङ्गारान् निरूहति॰ अथ यत्तणेनावद्योतयति॰ अथ यदपः प्रत्यानय ति॰ अथ यत्समिधमभ्यादधाति॰ सोमाहुतिघट्टः। प्राणाय त्वा इति समिधमभ्यादधाति। अपानेमृतमधां स्वाहा इति जुहोति। अथ सुचमभिमृशति हृदयं प्रेतिर्मनः संततिश्चक्षुरानतिः श्रोत्रमुपनतिर्वागागतिः॥ प्रतीतं देवेभ्यो जुष्टं हव्यमस्तात्॥ अमृते मामधात्॥ आ मां प्राणा विशन्तु भूयसे सुकृतायेति॰ तद्ध जनको वैदेहो याज्ञवल्क्यं पप्रच्छ वेत्थाग्निहोत्रं याज्ञवल्क्या इति। वेदेति होवाच। किमिति। पय इति। यत्पयो न स्यात् केन जुहुया इति। व्रीहियवाभ्यामिति। यहीहियवौ न स्यातां केन जुहुया इति। यदन्यद्धान्यं तेनेति। यदन्यद्धान्यं न स्यात् केन जुहुया इति। आरण्याभिरोषधीभिरिति। यदारण्या ओषधयो न स्युः केन जुहुया इति। अद्भिरिति। यदापो न स्युः केन जुहुया इति। स होवाच न वा इह तर्हि किंचनासीदयैतदु हूयत इव सत्यं श्रद्धायामिति। तं होवाच वेत्थाग्निहोत्रं याज्ञवल्क्य नमस्तेस्तु सहस्रं भगवो दद्म इति॰ रौद्रं गवि, वायव्यमुपसृष्टमाश्विनं दुह्यमानमग्नीषोमीयं दुग्धं, पौष्णाः प्रेन्दवो, मैत्रः शरो, वारुणमधिश्रितं, वैष्णवं प्रतिष्ठाप्यमानं, वैश्वदेवमुन्नीतं, सवितुः प्रक्रान्तं, द्यावापृथिव्योरुपसन्नम्, इन्द्राग्न्योः पूर्वाहुतिः, प्रजापतेरुत्तरा। तदेतत् सप्तदशमग्निहोत्रम्॰ तद्वैतदग्निहोत्रं द्वादशाहं ब्रह्म जुहुवांचकार। द्वादशाहं प्रजापतिर्द्वादशाहं देवाश्वर्षयश्च।

## अग्निहोत्र प्रायश्चित्तानि

तद् द्वादशाहं द्वादशाहं हुत्वा कामान् निकामानापुः। किमु य एनं यावज्जीवं जुहुयात्॰ उपसृज्याग्निहोत्रीमित्याह उपसृष्टे द्यावापृथिवी। रुद्रा उपगृह्णन्ति वसूनां दुग्धम्। भूतकृत स्थ निरूढं जन्यं भयमित्यङ्गारान् निरूहति। अथाधिश्रयति वैश्वानरस्याधिश्रितमसि॥ अग्निस्ते तेजो मा प्रतिधाक्षीत्॥ सत्याय त्वा इति। अथावद्योतयति सं ज्योतिषा ज्योतिरिति। अथापः प्रत्यानयति यस्ते अप्सु रसः प्रविष्टस्तेन संपृष्यस्व इति। स यदेवास्य तत्र दिशों प्रसन्ते तदेवास्य तत्समन्वानयति अन्तरितं रक्षोन्तरिता अरातय इति। त्रिः पर्यग्नि करोति। अथोद्वासयति दिवं हान्तरिक्षं दृह पृथिवीं दृह प्रजां पशून् जुह्वतो मे दंह इति। भूतकृत स्थ प्रत्यूढं जन्यं भयमित्यङ्गारान् प्रत्यूहति। अथ स्रुवं च सुचं चादाय निष्टपति प्रत्युष्टं रक्षः प्रत्युष्टा अरातय इति। अथ सुचं संमार्ष्टि सजूर्देवेभ्यः सायंयावभ्य इति सायम्। सजूर्देवेभ्यः प्रातर्यावभ्य इति प्रातः। सुवर्णां त्वां सुवर्णमयीम्॥ हिरण्ययष्टिरस्यमृतपलाशा स्रोतो यज्ञानाम् इति॰ अथाह उन्नेष्यामि इति। ओं मामहं स्वर्गं छोकमभि इति ब्रूयात्। स यं प्रथमं स्रुबमुन्नयति अथ यं द्वितीयं सुबमुन्नयति अथ यं तृतीयं स्रुवमुन्नयति॰ अथ यं चतुर्थं स्रुवमुन्नयति॰ अथ समिधमादाय प्राङ् प्रैति। पुरुष इत्सभित्। तमन्नमिन्धे अन्नस्य मा तेजसा स्वर्ग लोकं गमय॥ यत्र देवानामृषीणां प्रियं धाम तत्र म इदमग्निहोत्रं गमय इति। तूष्णीमुपसादयति। अथ समिधमभ्यादधाति स्वर्गस्य त्वा लोकस्य संक्रमणं हिरण्मयं वंशं दधामि स्वाहा इति। अथ जुहोति। स यां प्रथमां जुहोति देवांस्तयानोति। अथ यां द्वितीयां जुहोत्यृषींस्तयाप्नोति। अथोपमार्ष्टि। स यत्प्रथममुपमार्ष्टि॰ अथ यद्द्वितीयमुपमार्ष्टि॰ अथ यद्विरङ्गुल्या प्राश्नाति॰ अथ यत्सुचा प्राश्नाति॰ अथ यत्सुचं निरश्नाति॰ अथ यत्सुचः संक्षालनं निनयति॰ अथ या एतास्सुचो निर्णिज्योदीचीरप उस्तिशाति॰ अथ यत्स्थालीसंक्षालनं निनयति॰ अथ यत् पश्चाद्वा पुरस्ताद्वा परिक्रम्य दक्षिणतोग्नीनामास्ते प्रजापतिरेव तद् भूत्वास्ते कमहमस्मि कं मम इति॰॥